(नेपथ्ये ।)

भो, अण्णं वम्हणं उवणिमन्तेदु भवम् । वावुडो दाणिं अहम् । (क)

**सूत्रधारः**—अज्ज, संपण्णं भोअणं णीसवत्तं अ । अवि अ दक्खिणा वि दे भविस्सदि । (ख)

(पुनर्नेपथ्ये ।)

भो, दाणिं पढमं ज्जेव पच्चादिट्ठोसि, ता को दाणिं दे णिब्बन्धो पदे पदे मं अनुबन्धेदुम् । (ग)

**सूत्रधारः**—पच्चादिट्ठोम्हि एदिणा । भोदु । अण्णं वम्हणं उवणिमन्तेमि । (घ) (इति निष्क्रान्तः ।)

**इत्यामुखम् ।**

---

च्छति । भवतु । प्रक्ष्यामि तावत् । अद्य मैत्रेय, अस्माकं गृहेऽशितुमग्रणीर्भवत्वार्यः ।

(क) भोः, अन्यं ब्राह्मणमुपनिमन्त्रयतु भवान् । व्यापृत इदानीमहम् ।

(ख) आर्य, संपन्नं भोजनं निःसपत्नं च । अपि च दक्षिणापि ते भविष्यति ।

(ग) भोः, इदानीं प्रथममेव प्रत्यादिष्टोऽसि, तत्क इदानीं ते निर्बन्धः पदे पदे मामनुरोद्धुम् ।

(घ) प्रत्यादिष्टोऽस्म्येतेन । भवतु । अन्यं ब्राह्मणमुपनिमन्त्रयामि ।

---

समृद्धायामस्मत्सदृशो ब्राह्मणोऽन्वेषितव्यः । कोऽर्थः । यदा दुःस्थिता भवन्ति ब्राह्मणास्तदा चारणादीनामपि गृहे कुर्वन्ति भोजनम् । एष चारुदत्तस्य मित्रं मैत्रेयः । इदो जेव्व इत एव । आगच्छति । भवतु । इममुपनिमन्त्रयिष्ये । अद्य मैत्रेय, अस्माकं गृहे भोक्तुम् । अग्गणी अग्रणीः । प्रष्ठोऽग्रगामीति यावत् । 'अधिदी भोदु' इत्यपि पाठः । तत्रातिथी भवत्वित्यर्थः । भो, अण्णं अन्यम् । बम्हणं ब्राह्मणम् । उवणिमन्तेदु उपनिमन्त्रयतु । भवान् । वावडो व्यापृतः । अहमिदानीं कार्यान्तरव्यासक्तः । दाणिं इदानीम् ॥ संपन्नं मृष्टम् । णिसवत्तं च । पितॄणां समुत्सृष्टं घृतादिसहिततण्डुलपूर्णपात्रम् । 'निःस्राव' इति यस्य प्रसिद्धिः । 'णीसवत्तं निःसपत्नम् । विपक्षस्यापरस्याभावात्' इति केचित् । अपि च दक्षिणापि ते भविष्यति । एकोऽपिः संभावनायाम्, अपरः समुच्चये । भो, दाणिं पच्चादि-

**माथुरः**—अत्थि । दशसुवण्णं धालेदि । किं तस्स । (क)

**चेटी**—तस्स कारणादो अज्जआ इमं हत्थाभरणं पडिवादेदि । णहि णहि । सो ज्जेव पडिवादेदि । (ख)

**माथुरः**—(सहर्षं गृहीत्वा ।) अले, भणेशि तं कुलपुत्तम्—'भूदं तुए गण्डे । आअच्छ । पुणो जूदं रमअ' । (ग)

(इति निष्क्रान्तौ ।)

**चेटी**—(वसन्तसेनामुपसृत्य ।) अज्जए, पडितुट्टा गदा सहिअजूदिअरा । (घ)

**वसन्तसेना**—ता गच्छदु । अज्ज बन्धुअणो समस्ससदु । (ङ)

**संवाहकः**—अज्जए, जइ एव्वं ता इअं कला पलिअणहत्थगदा कलीअदु । (च)

**वसन्तसेना**—अज्ज, जस्स कारणादो इअं कला सिक्खीअदि, सो ज्जेव अज्जेण सुस्सूसिदपुरुव्वो सुस्सूसिदव्वो । (छ)

**संवाहकः**—(स्वगतम् ।) अज्जआए णिउअं पच्चादिट्ठो म्हि । कधं पच्चुवकलिश्शम् । (प्रकाशम् ।) अज्जए, अहं एदिणा जूदिअला-

---

(क) अस्ति । दशसुवर्णं धारयति । किं तस्य ।

(ख) तस्य कारणादार्येदं हस्ताभरणं प्रतिपादयति । नहि नहि । स एव प्रतिपादयति ।

(ग) अरे, भणसि तं कुलपुत्रम्—'भूतस्तव गण्डः । आगच्छ । पुनर्द्यूतं रमस्व' ।

(घ) आर्ये, परितुष्टौ गतौ सभिकद्यूतकरौ ।

(ङ) तद्गच्छतु । अद्य बन्धुजनः समाश्वसतु ।

(च) आर्ये, यद्येवं तदियं कला परिजनहस्तगता क्रियताम् ।

(छ) आर्य, यस्य कारणादियं कला शिक्ष्यते, स एवार्येण शुश्रूषितपूर्वः शुश्रूषितव्यः ।

---

आलोकयन्ती कटाक्षेण ॥१६॥ मम विभवो नास्ति । अन्यत्र गच्छ॥ धारयति ॥ यस्य पार्श्वलभ्यमीदृशं तं संवाहकं कुलपुत्रम् । भूतो गण्डः । सुविधानमित्यर्थः । 'खण्ड' इति मरहट्टप्रसिद्धः । तत्पुनरपि द्यूतं रमामहे ॥ इयं कला संवाहक(न)-

**वसन्तसेना**—कण्णऊरअ, जाणीहि दाव किं एसो जादीकुसुमवासिदो पावारओ ण वेत्ति । (क)

**कर्णपूरकः**—अज्जए, मदगन्धेण सुट्ठु तं गन्धं ण जाणामि। (ख)

**वसन्तसेना**—णामं पि दाव पेक्ख । (ग)

**कर्णपूरकः**—इमं णामं अज्जआ एव्व वाएदु। (घ) (इति प्रावारकमुपनयति ।)

**वसन्तसेना**—अज्जचारुदत्तस्स । (ङ) (इति वाचयित्वा सस्पृहं गृहीत्वा प्रावृणोति ।)

**चेटी**—कण्णऊरअ, सोहदि अज्जआए पावारओ । (च)

**कर्णपूरकः**—आं, सोहदि अज्जआए पावारओ । (छ)

**वसन्तसेना**—कण्णऊरअ, इदं दे पारितोसिअम् । (ज) (इत्याभरणं प्रयच्छति ।)

**कर्णपूरकः**—(शिरसा गृहीत्वा प्रणम्य च ।) संपदं सुट्ठु सोहदि अज्जआए पावारओ । (झ)

---

(क) कर्णपूरक, जानीहि तावत्किमेष जातीकुसुमवासितः प्रावारको न वेति ।

(ख) आर्ये, मदगन्धेन सुष्ठु तं गन्धं न जानामि ।

(ग) नामापि तावत्प्रेक्षस्व ।

(घ) इदं नामार्यैव वाचयतु ।

(ङ) आर्यचारुदत्तस्य ।

(च) कर्णपूरक, शोभत आर्यायाः प्रावारकः ।

(छ) आं, शोभत आर्यायाः प्रावारकः ।

(ज) कर्णपूरक, इदं ते पारितोषिकम् ।

(झ) सांप्रतं सुष्ठु शोभत आर्यायाः प्रावारकः ।

---

परामुसिअ परामृष्य ॥ आं, सोहदीति । मया साहसार्जितेन न युक्तमेतदिति भावः । प्रवृत्तश्वलितः ॥

इति द्यूतकरसंवाहको नाम द्वितीयोऽङ्कः ।

**विदूषकः**—भो, जदा तुमं मए भणिदो सि—'शीदलो दे अग्गहत्थो' । (क)

**चारुदत्तः**—कदाचिदेवमपि स्यात् । (सर्वतो निरूप्य सहर्षम् ।) वयस्य, दिष्ट्या ते प्रियं निवेदयामि ।

**विदूषकः**—किं ण अवहिदम् । (ख)

**चारुदत्तः**—हृतम् ।

**विदूषकः**—तधा वि किं पिअम् । (ग)

**चारुदत्तः**—यदसौ कृतार्थो गतः ।

**विदूषकः**—णासो क्खु सो । (घ)

**चारुदत्तः**—कथं न्यासः । (मोहमुपगतः ।)

**विदूषकः**—समस्ससदु भवम् । जइ णासो चोरेण अवहिदो तुमं किं मोहं उवगदो । (ङ)

**चारुदत्तः**—(समाश्वस्य ।) वयस्य,

कः श्रद्धास्यति भूतार्थं सर्वो मां तूलयिष्यति ।
शङ्कनीया हि लोकेऽस्मिन्निष्प्रतापा दरिद्रता ॥ २४ ॥

भोः, कष्टम् ।

यदि तावत्कृतान्तेन प्रणयोऽर्थेषु मे कृतः ।
किमिदानीं नृशंसेन चारित्रमपि दूषितम् ॥ २५ ॥

**विदूषकः**—अहं क्खु अवलविस्सम्—'केण दिण्णम्, केण गहिदम्, को वा सक्खि' त्ति । (च)

---

(क) भोः, यदा त्वं मया भणितोऽसि—'शीतलस्तेऽग्रहस्तः' ।

(ख) किं नापहृतम् ।

(ग) तथापि किं प्रियम् ।

(घ) न्यासः खलु सः ।

(ङ) समाश्वसितु भवान् । यदि न्यासश्चौरेणापहृतस्त्वं किं मोहमुपगतः ।

(च) अहं खल्वपलपिष्यामि—'केन दत्तम्, केन गृहीतम्, को वा साक्षी' इति ।

---

**क इति** । निष्प्रतापा निष्पौरुषा ॥ २४ ॥ **यदीति** । प्रणयोऽर्थित्वम् ॥ २५ ॥

**वसन्तसेना**—हञ्जे, णाणापुरिससङ्गेण वेस्साजणो अलीअदक्खिणो भोदि । (क)

**मदनिका**—जदो दाव अज्जआए दिट्ठी इध अभिरमदि हिअअं च, तस्स कारणं किं पुच्छीअदि । (ख)

**वसन्तसेना**—हञ्जे, सहीजणादो उवहसणीअदां रक्खामि । (ग)

**मदनिका**—अज्जए, एव्वं णेदम् । सहीजणचित्ताणुवत्ती अवलाअणो भोदि । (घ)

**प्रथमा चेटी**—(उपसृत्य ।) अज्जए, अत्ता आणवेदि—'गहिदावगुण्ठणं पक्खदुआरए सज्जं पवहणम् । ता गच्छ' त्ति । (ङ)

**वसन्तसेना**—हञ्जे, किं अज्जचारुदत्तो मं णइस्सदि (च)

**चेटी**—अज्जए, जेण पवहणेण सह सुवण्णदससाहस्सिओ अलंकारओ अणुप्पेसिदो । (छ)

**वसन्तसेना**—को उण सो । (ज)

**चेटी**—एसो ज्जेव राअस्सालो संठाणओ । (झ)

---

(क) चेटि, नानापुरुषसङ्गेन वेश्याजनोऽलीकदक्षिणो भवति ।

(ख) यतस्तावदार्याया दृष्टिरिहाभिरमते हृदयं च, तस्य कारणं किं पृच्छ्यते ।

(ग) चेटि, सखीजनादुपहसनीयतां रक्षामि ।

(घ) आर्ये, एवं नेदम् । सखीजनचित्तानुवर्त्यबलाजनो भवति ।

(ङ) आर्ये, माताज्ञापयति—'गृहीतावगुण्ठनं पक्षद्वारे सज्जं प्रवहणम् । तद्गच्छ' इति ।

(च) चेटि, किमार्यचारुदत्तो मां नेष्यति ।

(छ) आर्ये, येन प्रवहणेन सह सुवर्णदशसाहस्रिकोऽलंकारोऽनुप्रेषितः ।

(ज) कः पुनः सः ।

(झ) एष एव राजश्यालः संस्थानकः ।

---

तस्सेत्यादि । यत्र चक्षुर्हृदये लग्ने तत्र कारणं किं पर्यालोच्यते । अतिप्रियनामासावलं विलम्बेनेत्याशयः ॥ गहिदावगुण्ठणं गृहीतावगुण्ठनम् ॥

**वसन्तसेना**—को क्खु अवरो उवाओ हुविस्सदि । (क)

**मदनिका**—तस्स ज्जेव अज्जस्स केरओ भविअ एदं अलंकारअं अज्जआए उवणेहि । (ख)

**शर्विलकः**—एवं कृते किं भवति ।

**मदनिका**—तुमं दाव अचोरो, सो वि अज्जो अरिणो, अज्जआए सकं अलंकारअं उवगदं भोदि । (ग)

**शर्विलकः**—नन्वतिसाहसमेतत् ।

**मदनिका**—अइ, उवणेहि । अण्णधा अदिसाहसम् । (घ)

**वसन्तसेना**—साहु मदणिए, साहु । अभुजिस्सए विअ मन्तिदम् । (ङ)

**शर्विलकः**—

मयाप्ता महती बुद्धिर्भवतीमनुगच्छता ।
निशायां नष्टचन्द्रायां दुर्लभो मार्गदर्शकः ॥ २१ ॥

**मदनिका**—तेण हि तुमं इमस्सिं कामदेवगेहे मुहुत्तअं चिट्ठ, जाव अज्ज आए तुह आगमणं णिवेदेमि । (च)

**शर्विलकः**—एवं भवतु ।

**मदनिका**—(उपसृत्य ।) अज्जए, एसो क्खु चारुदत्तस्स सआसादो बम्हणो आअदो । (छ)

---

(क) कः खल्वपर उपायो भविष्यति ।

(ख) तस्यैवार्यस्य संबन्धी भूत्वेममलंकारकमार्याया उपनय ।

(ग) त्वं तावदचौरः, सोऽप्यार्योऽनृणः, आर्यया स्वकोऽलंकार उपगतो भवति ।

(घ) अयि, उपनय । अन्यथातिसाहसम् ।

(ङ) साधु मदनिके, साधु । अभुजिष्ययेव मन्त्रितम् ।

(च) तेन हि त्वमस्मिन्कामदेवगेहे मुहूर्तकं तिष्ठ, यावदार्यायै तवागमनं निवेदयामि ।

(छ) आर्ये, एष खलु चारुदत्तस्य सकाशाद्ब्राह्मण आगतः ।

---

अथ निजपतित्वेनैवमाह—तुमं जेवेति । इदानीं ब्राह्मणभार्यात्वेनेति भावः । **म**-

**वसन्तसेना**—हञ्जे, तस्स केरअं त्ति कधं तुमं जाणासि। (क)

**मदनिका**—अज्जए, अत्तणकेरअं वि ण जाणामि। (ख)

**वसन्तसेना**—(स्वगतं सशिरःकम्पं विहस्य।) जुज्जदि। (प्रकाशम्।) पविसदु। (ग)

**मदनिका**—जं अज्जआ आणवेदि। (उपगम्य।) पविसदु सव्विलओ। (घ)

**शर्विलकः**—(उपसृत्य सवैलक्ष्यम्।) स्वस्ति भवत्यै।

**वसन्तसेना**—अज्ज, वन्दामि। उवविसदु अज्जो। (ङ)

**शर्विलकः**—सार्थवाहस्त्वां विज्ञापयति—'जर्जरत्वाद्गृहस्य दूरक्ष्यमिदं भाण्डम्। तद्गृह्यताम्'। (इति मदनिकायाः समर्प्य प्रस्थितः।)

**वसन्तसेना**—अज्ज, ममावि दाव पडिसंदेसं तहिं अज्जो णेदु। (च)

**शर्विलकः**—(स्वगतम्।) कस्तत्र यास्यति। (प्रकाशम्।) कः प्रतिसंदेशः।

**वसन्तसेना**—पडिच्छदु अज्जो मदणिअम्। (छ)

**शर्विलकः**—भवति, न खल्ववगच्छामि।

**वसन्तसेना**—अहं अवगच्छामि। (ज)

**शर्विलकः**—कथमिव।

**वसन्तसेना**—अहं अज्जचारुदत्तेण भणिदा—'जो इमं अ-

(क) चेटि, तस्य संबन्धीति कथं त्वं जानासि।

(ख) आर्ये, आत्मसंबन्धिनमपि न जानामि।

(ग) युज्यते। प्रविशतु।

(घ) यदार्याज्ञापयति। प्रविशतु शर्विलकः।

(ङ) आर्य, वन्दे। उपाविशत्वार्यः।

(च) आर्य, ममापि तावत्प्रतिसंदेशं तत्रार्यो नयतु।

(छ) प्रतीच्छत्वार्यो मदनिकाम्।

(ज) अहमवगच्छामि।

येति ॥ २१ ॥ अत्तणकेरअं वीति चारुदत्तस्यानुचरत्वं स्वीकृत्य ब्रूते।

**चेटी**—अज्ज, ओणामेहि दिट्ठिम्। पेक्ख अज्जअम्। (क)

**विदूषकः**—(दृष्ट्वा उपसृत्य।) सोत्थि भोदीए। (ख)

**वसन्तसेना**—(संस्कृतमाश्रित्य।) अये, मैत्रेयः। (उत्थाय।) स्वागतम्। इदमासनम्। अत्रोपविश्यताम्।

**विदूषकः**—उपविसदु भोदी। (ग)

(उभावुपविशतः।)

**वसन्तसेना**—अपि कुशलं सार्थवाहपुत्रस्य।

**विदूषकः**—भोदि, कुशलम्। (घ)

**वसन्तसेना**—आर्य मैत्रेय, अपीदानीं

गुणप्रवालं विनयप्रशाखं
विश्रम्भमूलं महनीयपुष्पम्।
तं साधुवृक्षं स्वगुणैः फलाढ्यं
सुहृद्विहङ्गाः सुखमाश्रयन्ति॥ ३२॥

**विदूषकः**—(स्वगतम्।) सुट्ठु उवलक्खिदं दुट्ठविलासिणीए। (प्रकाशम्।) अध इं। (ङ)

**वसन्तसेना**—अये, किमागमनप्रयोजनम्।

**विदूषकः**—सुणादु भोदी। तत्तभवं चारुदत्तो सीसे अञ्जलिं कदुअ भोदिं विण्णवेदि। (च)

---

(क) आर्य, अवनमय दृष्टिम्। पश्यार्याम्।

(ख) स्वस्ति भवत्यै।

(ग) उपविशतु भवती।

(घ) भवति, कुशलम्।

(ङ) सुष्ठूपलक्षितं दुष्टविलासिन्या। अथ किम्।

(च) शृणोतु भवती। तत्रभवांश्चारुदत्तः शीर्षेऽञ्जलिं कृत्वा भवतीं विज्ञापयति।

---

वुच्छो वृक्षः। घनरुधिरपङ्कचर्चिका चर्चा यस्य सः॥ ३१॥ ओणामेहि अवनमय॥ **गुणेति**॥ ३२॥ से अस्याः (?) भावे क्तयोगे षष्ठी (?)।

**वसन्तसेना**—(अञ्जलिं बद्ध्वा ।) किमाज्ञापयति ।

**विदूषकः**—मए तं सुवण्णभण्डअं विस्सम्भादो अत्तणकेरकेत्ति कदुअ जूदे हारिदम् । सो अ सहिओ राअवत्थहारी ण जाणिअदि कहिं गदो त्ति । (क)

**चेटी**—अज्जए, दिट्ठिआ वड्ढसि । अज्जो जूदिअरो संवुत्तो । (ख)

**वसन्तसेना**—(स्वगतम् ।) कधम् । चोरेण अवहिदं पि सोण्डीरदाए जूदे हारिदं त्ति भणादि । अदो ज्जेव कामीअदि । (ग)

**विदूषकः**—ता तस्स कारणादो गेण्हदु भोदी इमं रअणावलिम् । (घ)

**वसन्तसेना**—(आत्मगतम् ।) किं दंसेमि तं अलंकारअम् । (विचिन्त्य ।) अधवा ण दाव । (ङ)

**विदूषकः**—किं दाव ण गेण्हदि भोदी एदं रअणावलिम् । (च)

**वसन्तसेना**—(विहस्य सखीमुखं पश्यन्ती ।) मित्तेअ, कधं ण गेण्हिस्सं रअणावलिम् । (इति गृहीत्वा पार्श्वे स्थापयति । स्वगतम् ।) कधं झीणकुसुमादो वि सहआरपादवादो मअरन्दबिन्दओ णिवडन्ति । (प्रकाशम् ।) अज्ज, विण्णवेहि तं जूदिअरं मम वअणेण अज्जचारुद-

---

(क) मया तत्सुवर्णभाण्डं विश्रम्भादात्मीयमिति कृत्वा द्यूते हारितम् । स च सभिको राजवार्ताहारी न ज्ञायते कुत्र गत इति ।

(ख) आर्ये, दिष्ट्या वर्धसे । आर्यो द्यूतकरः संवृत्तः ।

(ग) कथम् । चौरेणापहृतमपि शौण्डीरतया द्यूते हारितमिति भणति । अत एव काम्यते ।

(घ) तत्तस्य कारणाद्गृह्णातु भवतीमां रत्नावलीम् ।

(ङ) किं दर्शयामि तमलंकारम् । अथवा न तावत् ।

(च) किं तावन्न गृह्णाति भवतीमां रत्नावलीम् ।

---

छात्रस्य हसितमिति यथा ॥ अध इं अथ किम् । अनुमतौ ॥ राअवत्थहारी वार्त्तिकः ॥ सोण्डीरदाए शौण्डीर्येणाशयमहत्त्वेन ॥ भोदी भवती ॥ भणामीत्यनन्तरं

**विदूषकः**—अरे दासीए पुत्ता, गिम्हे । (क)

**चेटः**—(सहासम् ।) अले, णहि णहि । (ख)

**विदूषकः**—(स्वगतम् ।) किं दाणिं एत्थ कहिस्सम् । (विचिन्त्य ।) भोदु । चारुदत्तं गदुअ पुच्छिस्सम् । (प्रकाशम् ।) अरे, मुहुत्तअं चिट्ठ । (चारुदत्तमुपसृत्य ।) भो वअस्स, पुच्छिस्सं दाव, कस्सिं काले चूआ मोलेन्ति । (ग)

**चारुदत्तः**—मूर्ख, वसन्ते ।

**विदूषकः**—(चेटमुपगम्य ।) मुक्ख, वसन्ते । (घ)

**चेटः**—दुदिअ दे पण्हं दइश्शम् । शुशमिद्धाणं गामाणं का लक्खअं कलेदि । (ङ)

**विदूषकः**—अरे, रच्छा । (च)

**चेटः**—(सहासम् ।) अले, णहि णहि । (छ)

**विदूषकः**—भोदु । संसए पडिदम्हि । (विचिन्त्य ।) भोदु । चारुदत्तं पुणो वि पुच्छिस्सम् । (ज) (पुनर्निवृत्य चारुदत्तं तथैवोदाहरति ।)

---

(क) अरे दास्याः पुत्र, ग्रीष्मे ।

(ख) अरे, नहि नहि ।

(ग) किमिदानीमत्र कथयिष्यामि । भवतु । चारुदत्तं गत्वा प्रक्ष्यामि । अरे, मुहूर्तकं तिष्ठ । भो वयस्य, प्रक्ष्यामि तावत्, कस्मिन्काले चूता मुकुलिता भवन्ति ।

(घ) मूर्ख, वसन्ते ।

(ङ) द्वितीयं ते प्रश्नं दास्यामि । सुसमृद्धानां ग्रामाणां का रक्षां करोति ।

(च) अरे, रथ्या ।

(छ) अरे, नहि नहि ।

(ज) भवतु । संशये पतितोऽस्मि । भवतु । चारुदत्तं पुनरपि प्रक्ष्यामि ।

**चारुदत्तः**—वयस्य, सेना ।

**विदूषकः**—(चेटमुपगम्य ।) अरे दासीए पुत्ता, सेणा । (क)

**चेटः**—अले, दुवे वि एक्कस्शिं कडुअ शिग्घं भणाहि । (ख)

**विदूषकः**—सेणावसन्ते । (ग)

**चेटः**—णं पलिवत्तिअ भणाहि । (घ)

**विदूषकः**—(कायेन परिवृत्य ।) सेणावसन्ते । (ङ)

**चेटः**—अले मुक्ख बडुका, पदाइं पलिवत्तावेहि । (च)

**विदूषकः**—(पादौ परिवर्त्य ।) सेणावसन्ते । (छ)

**चेटः**—अले मुक्ख, अक्खलपदाइं पलिवत्तावेहि । (ज)

**विदूषकः**—(विचिन्त्य ।) वसन्तसेणा । (झ)

**चेटः**—एशा शा आअदा । (ञ)

**विदूषकः**—ता जाव चारुदत्तस्स णिवेदेमि । (उपसृत्य ।) भो चारुदत्त, धणिओ दे आअदो । (ट)

**चारुदत्तः**—कुतोऽस्मत्कुले धनिकः ।

**विदूषकः**—जइ कुले णत्थि, ता दुवारे अत्थि । एसा वसन्तसेणा आअदा । (ठ)

---

(क) अरे दास्याः पुत्र, सेना ।

(ख) अरे, द्वे अप्येकस्मिन्कृत्वा शीघ्रं भण ।

(ग) सेनावसन्ते ।

(घ) ननु परिवर्त्य भण ।

(ङ) सेनावसन्ते ।

(च) अरे मूर्ख बटुक, पदे परिवर्तय ।

(छ) सेनावसन्ते ।

(ज) अरे मूर्ख अक्षरपदे परिवर्तय ।

(झ) वसन्तसेना ।

(ञ) एषा सागता ।

(ट) तद्यावच्चारुदत्तस्य निवेदयामि । भो चारुदत्त, धनिकस्त आगतः ।

(ठ) यदि कुले नास्ति, तद्द्वारेऽस्ति । एषा वसन्तसेनागता ।

**चेटी**—एसा क्खु अज्जआ एव्वं पुच्छिदुं आअदा—'केत्तिअं ताए रअणावलीए मुल्लं' त्ति । (क)

**विदूषकः**—(जनान्तिकम् ।) भो, भणिदं मए, जधा अप्पमुल्ला रअणावली, वहुमुल्लं सुवण्णभण्डअम् । ण परितुट्टा । अवरं मग्गिदुं आअदा । (ख)

**चेटी**—सा क्खु अज्जआए अत्तणकेरकेत्ति भणिअ जूदे हारिदा । सो अ सहिओ राअवात्थहारी ण जाणीअदि कहिं गदो त्ति । (ग)

**विदूषकः**—भोदि, मन्तिदं ज्जेव मन्तीअदि । (घ)

**चेटी**—जाव सो अण्णेसीअदि ताव एदं ज्जेव गेण्ह सुवण्णभण्डअम् । (ङ) (इति दर्शयति ।)

(विदूषको विचारयति ।)

**चेटी**—अदिमेत्तं अज्जो णिज्झाअदि । ता किं दिट्टपुरुव्वो दे । (च)

**विदूषकः**—भोदि, सिप्पकुसलदाए ओवन्धेदि दिट्ठिम् । (छ)

**चेटी**—अज्ज, वञ्चिदोसि दिट्टीए । तं ज्जेव एदं सुवण्णभण्डअम् । (ज)

---

(क) एषा खल्वार्या एवं प्रष्टुमागता—'कियत्तस्या रत्नावल्या मूल्यम्' इति ।

(ख) भोः, भणितं मया, यथाल्पमूल्या रत्नावली, वहुमूल्यं सुवर्णभाण्डम् । न परितुष्टा । अपरं याचितुमागता ।

(ग) सा खल्वार्यया आत्मीयेति भणित्वा द्यूते हारिता । स च सभिको राजवार्ताहारी न ज्ञायते कुत्र गत गति ।

(घ) भवति, मन्त्रितमेव मन्त्र्यते ।

(ङ) यावत्सोऽन्विष्यते तावदिदमेव गृहाण सुवर्णभाण्डम् ।

(च) अतिमात्रमार्यो निध्यायति । तत्किं दृष्टपूर्वं ते ।

(छ) भवति, शिल्पकुशलतयावबध्नाति दृष्टिम् ।

(ज) आर्य, वञ्चितोऽसि दृष्ट्या । तदेवेदं सुवर्णभाण्डम् ।

**विदूषकः**—(सहर्षं ।) भो वअस्स, तं ज्जेव एदं सुवण्णभण्डअम्, जं अम्हाणं गेहे चोरेहिं अवहिदम् । (क)

**चारुदत्तः**—वयस्य,

योऽस्माभिश्चिन्तितो व्याजः कर्तुं न्यासप्रतिक्रियाम् ।
स एव प्रस्तुतोऽस्माकं किंतु सत्यं विडम्बना ॥ ३९ ॥

**विदूषकः**—भो वअस्स, सच्चं सबामि बम्हणेण । (ख)

**चारुदत्तः**—प्रियं नः प्रियम् ।

**विदूषकः**—(जनान्तिकम् ।) भो, पुच्छामि णं कुदो एदं समासादिदं त्ति । (ग)

**चारुदत्तः**—को दोषः ।

**विदूषकः**—(चेट्याः कर्णे ।) एव्वं विअ । (घ)

**चेटी**—(विदूषकस्य कर्णे) एव्वं विअ । (ङ)

**चारुदत्तः**—किमिदं कथ्यते । किं वयं बाह्याः ।

**विदूषकः**—(चारुदत्तस्य कर्णे ।) एव्वं विअ । (च)

**चारुदत्तः**—भद्रे, सत्यं तदेवेदं सुवर्णभाण्डम् ।

**चेटी**—अज्ज, अध इं । (छ)

**चारुदत्तः**—भद्रे, न कदाचित्प्रियनिवेदनं निष्फलीकृतं मया ।

---

(क) भो वयस्य, तदेवेदं सुवर्णभाण्डम्, यदस्माकं गृहे चौरैरपहृतम् ।
(ख) भो वयस्य, सत्यं शपे ब्राह्मण्येन ।
(ग) भोः, पृच्छामि ननु कुत इदं समासादितमिति ।
(घ) एवमिव ।
(ङ) एवमिव ।
(च) एवमिव ।
(छ) आर्य, अथ किम् ।

---

प्रेष्यतां भुज्यताम् (?) **य इति** । किं तु स एव व्याजो विडम्बनास्माकं प्रस्तुत आरब्धा ॥ ३९ ॥ अथवा सत्यमेवेदम् । अथवेति प्रकरणात्प्रतीयते । बम्हणेण

**चेटी**—अज्जए, जहिं चारुदत्तो। (क)

**वसन्तसेना**—(चेटीं परिष्वज्य।) सुट्ठु ण णिज्झाइदो रात्तीए। ता अज्ज पच्चक्खं पेक्खिस्सम्। हञ्जे, किं पविट्ठा अहं इह अब्भन्तरचदुस्सालअम्। (ख)

**चेटी**—ण केवलं अब्भन्तरचदुस्सालअम्। सव्वजणस्स विहिअअं पविट्ठा। (ग)

**वसन्तसेना**—अवि संतप्पदि चारुदत्तस्स परिअणो। (घ)

**चेटी**—संतप्पिस्सदि। (ङ)

**वसन्तसेना**—कदा। (च)

**चेटी**—जदोअज्जआ गमिस्सदि। (छ)

**वसन्तसेना**—तदो मए पढमं संतप्पिदव्वम्। (सानुनयम्।) हञ्जे, गेण्ह एदं रअणावलिम्। मम बहिणिआए अज्जाधूदाए गदुअ समप्पेहि। भणिदव्वं च—'अहं सिरिचारुदत्तस्स गुणणिज्जिदा दासी, तदा तुम्हाणं पि। ता एसा तुह ज्जेव कण्ठाहरणं होदु रअणावली। (ज)

---

(क) आर्ये, यत्र चारुदत्तः।

(ख) चेटि, सुष्ठु न निध्यातो रात्रौ। तदद्य प्रत्यक्षं प्रेक्षिष्ये। चेटि, किं प्रविष्टाहमिहाभ्यन्तरचतुःशालकम्।

(ग) न केवलमभ्यन्तरचतुःशालकम्। सर्वजनस्यापि हृदयं प्रविष्टा।

(घ) अपि संतप्यते चारुदत्तस्य परिजनः।

(ङ) संतप्स्यति।

(च) कदा।

(छ) यदार्या गमिष्यति।

(ज) तदा मया प्रथमं संतप्तव्यम्। चेटि, गृहाणेमां रत्नावलीम्। मम भगिन्या आर्याधूतायै गत्वा समर्पय। वक्तव्यं च—'अहं श्रीचारुदत्तस्य गुणनिर्जिता दासी, तदा युष्माकमपि। तदेषा तवैव कण्ठाभरणं भवतु रत्नावली'।

**चेटी**—अज्जए, कुपिस्सदि चारुदत्तो अज्जाए दाव । (क)

**वसन्तसेना**—गच्छ । ण कुपिस्सदि । (ख)

**चेटी**—(गृहीत्वा ।) जं आणवेदि । (इति निष्क्रम्य पुनः प्रविशति ।) अज्जए, भणादि अज्जा धूदा—'अज्जउत्तेण तुम्हाणं पसादीकिदा । ण जुत्तं मम एदं गेण्हिदुम् । अज्जउत्तो ज्जेव मम आहरणविसेसो त्ति जाणादु भोदी' । (ग)

(ततः प्रविशति दारकं गृहीत्वा रदनिका ।)

**रदनिका**—एहि वच्छ, सअडिआए कीलम्ह । (घ)

**दारकः**—(सकरुणम् ।) रदणिए, किं मम एदाए मट्टिआसअडिआए । तं ज्जेव सोवण्णसअडिअं देहि । (ङ)

**रदनिका**—(सनिर्वेदं निश्वस्य ।) जाद, कुदो अम्हाणं सुवण्णववहारो । तादस्स पुणो वि रिद्धीए सुवण्णसअडिआए कीलिस्ससि। ता जाव विणोदेमि णम् । अज्जआवसन्तसेणाआए समीवं उवसप्पिस्सम् । (उपसृत्य ।) अज्जए, पणमामि । (च)

**वसन्तसेना**—रदणिए, साअदं दे । कस्स उण अअं दारओ।

---

(क) आर्ये, कुपिष्यति चारुदत्त आर्यायै तावत् ।

(ख) गच्छ । न कुपिष्यति ।

(ग) यदाज्ञापयति । आर्ये, भणत्यार्या धूता—'आर्यपुत्रेण युष्माकं प्रसादीकृता । न युक्तं ममैतां ग्रहीतुम् । आर्यपुत्र एव ममाभरणविशेष इति जानातु भवती ।

(घ) एहि वत्स, शकटिकया क्रीडयावः ।

(ङ) रदनिके, किं ममैतया मृत्तिकाशकटिकया । तामेव सौवर्णशकटिकां देहि ।

(च) जात, कुतोऽस्माकं सुवर्णव्यवहारः । तातस्य पुनरपि ऋद्धया सुवर्णशकटिकया क्रीडिष्यसि । तद्यावद्विनोदयाम्येनम् । आर्यावसन्तसेनायाः समीपमुपसर्पिष्यामि । आर्ये, प्रणमामि ।

अणलंकिदसरीरो वि चन्दमुहो आणन्देदि मम हिअअम् । (क)

**रदनिका**—एसो क्खु अज्जचारुदत्तस्स पुत्तो रोहसेणो णाम । (ख)

**वसन्तसेना**—(बाहू प्रसार्य ।) एहि मे पुत्तअ, आलिङ्ग । (इत्यङ्क उपवेश्य ।) अणुकिदं अणेण पिदुणो रूवम् । (ग)

**रदनिका**—ण केवलं रूवम्, सीलं पि तक्केमि । एदिणा अज्जचारुदत्तो अत्ताणअं विणोदेदि । (घ)

**वसन्तसेना**—अध किंणिमित्तं एसो रोअदि । (ङ)

**रदनिका**—एदिणा पडिवेसिअगहवइदारअकेरिआए सुवण्णसअडिआए कीलिदम् । तेण अ सा णीदा । तदो उण तं मग्गन्तस्स मए इअं मट्टिआसअडिआ कदुअ दिण्णा । तदो भणादि—'रदणिए, किं मम एदाए मट्टिआसअडिआए । तं ज्जेव सोवण्णसअडिअं देहि' त्ति । (च)

**वसन्तसेना**—हद्धी हद्धी । अअं पि णाम परसंपत्तीए संतप्पदि । भअवं कअन्त, पोक्खरवत्तपडिदजलबिन्दुसरिसेहिं की-

---

(क) रदनिके, स्वागतं ते । कस्य पुनरयं दारकः । अनलंकृतशरीरोऽपि चन्द्रमुख आनन्दयति मम हृदयम् ।

(ख) एष खल्वार्यचारुदत्तस्य पुत्रो रोहसेनो नाम ।

(ग) एहि मे पुत्रक, आलिङ्ग । अनुकृतमनेन पितू रूपम् ।

(घ) न केवलं रूपम्, शीलमपि तर्कयामि । एतेनार्यचारुदत्त आत्मानं विनोदयति ।

(ङ) अथ किंनिमित्तमेष रोदिति ।

(च) एतेन प्रतिवेशिकगृहपतिदारकस्य सुवर्णशकटिकया क्रीडितम् । तेन च सा नीता । ततः पुनस्तां याचतो मयेयं मृत्तिकाशकटिका कृत्वा दत्ता । ततो भणति—'रदनिके, किं ममैतया मृत्तिकाशकटिकया । तामेव सौवर्णशकटिकां देहि' इति ।

---

कटेन प्रतिवेशिकगृहपतिदारकसंबन्धिन्या सुवर्णशकटिकया क्रीडितम् । तेन प्रति-

लसि तुमं पुरिसभाअधेएहिं। (इति साम्रा।) जाद, मा रोद। सोवण्णसअडिआए कीलिस्ससि। (क)

**दारकः**—रदणिए, का एसा। (ख)

**वसन्तसेना**—पिदुणो दे गुणणिज्जिदा दासी। (ग)

**रदनिका**—जाद, अज्जआ दे जणणी भोदि। (घ)

**दारकः**—रदणिए, अलिअं तुमं भणासि। जइ अम्हाणं अज्जआ जणणी ता कीस अलंकिदा। (ङ)

**वसन्तसेना**—जाद, मुद्धेण मुहेण अदिकरुणं मन्तेसि। (नाट्येनाभरणान्यवतार्य रुदती।) एसा दाणिं दे जणणी संवुत्ता। ता गेण्ह एदं अलंकारअम्। सोवण्णसअडिअं घडावेहि। (च)

**दारकः**—अवेहि। ण गेण्हिस्सम्। रोदसि तुमम्। (छ)

**वसन्तसेना**—(अश्रूणि प्रमृज्य।) जाद, ण रोदिस्सम्। गच्छ।

---

(क) हा धिक् हा धिक्। अयमपि नाम परसंपत्त्या संतप्यते। भगवन्कृतान्त, पुष्करपत्रपतितजलबिन्दुसदृशैः क्रीडसि त्वं पुरुषभागधेयैः। जात मा रुदिहि। सौवर्णशकटिकया क्रीडिष्यसि।

(ख) रदनिके, कैषा।

(ग) पितुस्ते गुणनिर्जिता दासी।

(घ) जात, आर्या ते जननी भवति।

(ङ) रदनिके, अलीकं त्वं भणसि। यद्यस्माकमार्या जननी, तत्किमर्थमलंकृता।

(च) जात, मुग्धेन मुखेनातिकरुणं मन्त्रयसि। एषेदानीं ते जननी संवृत्ता। तद्गृहाणैतमलंकारम्। सौवर्णशकटिकां कारय।

(छ) अपेहि। न ग्रहीष्यामि। रोदिषि त्वम्।

---

वेशिगृहपतिदारकेण॥ तव पितुर्गुणनिर्जिता दासी॥ अलिअं अलीकम्। असत्यमिति यावत्॥ बालहस्ताभ्यां सुवर्णपूर्णां शकटिकां दारकं च स्वयं गृहीत्वा

**चन्दनकः**—

सिण्णसिलाअलहत्थो पुरिसाणं कुच्चगण्ठिसंठवणो ।
कत्तरिवावुदहत्थो तुमं पि सेणावई जादो ॥ २२ ॥ (क)

**वीरकः**—अरे चन्दणआ, तुमं पि माणिज्जन्तो अप्पणो केरिकं जादिं ण सुमरेसि । (ख)

**चन्दनकः**—अरे, का मह चन्दणअस्स चन्दविसुद्धस्स जादी । (ग)

**वीरकः**—को भणउ । (घ)

**चन्दनकः**—भणउ, भणउ । (ङ)

(वीरको नाट्येन संज्ञां ददाति ।)

**चन्दनकः**—अरे, किं णेदम् । (च)

**वीरकः**—अरे, सुणाहि सुणाहि । (छ)

जादी तुज्झ विसुद्धा मादा भेरी पिदा वि दे पडहो ।
दुम्मुह करडअभादा तुमं पि सेणावई जादो ॥ २३ ॥ (ज)

---

(क) शीर्णशिलातलहस्तः पुरुषाणां कूर्चग्रन्थिसंस्थापनः ।
कर्तरीव्यापृतहस्तस्त्वमपि सेनापतिर्जातः ॥

(ख) अरे चन्दनक, त्वमपि मान्यमान, आत्मनो जातिं न स्मरसि ।

(ग) अरे, का मम चन्दनकस्य चन्द्रविशुद्धस्य जातिः ।

(घ) को भणतु ।

(ङ) भणतु, भणतु ।

(च) अरे, किं न्विदम् ।

(छ) अरे, शृणु शृणु ।

(ज) जातिस्तव विशुद्धा माता भेरी पितापि ते पटहः ।
दुर्मुख करटकभ्राता त्वमपि सेनापतिर्जातः ॥

---

नयः ॥ **सिण्णेत्यादि** । गाथा । शीर्णशिलातलहस्तः पुरुषाणां कूर्चग्रन्थिसंस्थापनः । कर्तरीव्यापृतहस्तस्त्वमपि सेनापतिर्जातः ॥ २२ ॥ **जादी तुज्झ विसुद्धेति** । गाथा । जातिस्तव विशुद्धा माता भेरी पितापि ते पटहः ।

**विटः**—किं ब्रवीति ।

**शकारः**—मावि गच्छदु, मावि चिश्टदु । मावि ऊशशदु, मावि णीशशदु । इध ज्जेव झत्ति पडिअ मलेदु । (क)

**भिक्षुः**—णमो बुद्धश्श । शलणागदम्हि । (ख)

**विटः**—गच्छतु ।

**शकारः**—णं शमएण । (ग)

**विटः**—कीदृशः समयः ।

**शकारः**—तधा कद्दमं फेलदु, जधा पाणिअं पङ्काइलं ण होदि । अधवा पाणिअं पुञ्जीकदुअ कद्दमे फेलदु । (घ)

**विटः**—अहो मूर्खता ।

विपर्यस्तमनश्चेष्टैः शिलाशकलवर्ष्मभिः ।
मांसवृक्षैरियं मूर्खैर्भाराक्रान्ता वसुंधरा ॥ ६ ॥

(भिक्षुर्नाट्येनाक्रोशति ।)

**शकारः**—किं भणादि । (ङ)

**विटः**—स्तौति भवन्तम् ।

**शकारः**—थुणु थुणु । पुणो वि थुणु । (च)

(तथा कृत्वा निष्क्रान्तो भिक्षुः ।)

---

(क) मापि गच्छतु, मापि तिष्ठतु । माप्युच्छ्वसितु, मापि निश्वसितु । इहैव झटिति पतित्वा म्रियताम् ।

(ख) नमो बुद्धाय । शरणागतोऽस्मि ।

(ग) ननु समयेन ।

(घ) तथा कर्दमं प्रक्षिपतु, यथा पानीयं पङ्काविलं न भवति । अथवा पानीयं पुञ्जीकृत्य कर्दमे क्षिपतु ।

(ङ) किं भणति ।

(च) स्तुनु स्तुनु । पुनरपि स्तुनु ।

---

विटोऽयमर्थ (?) ॥ पङ्काइलं पङ्काविलम् । कलुषमिति यावत् ॥ **विपर्यस्तमिति ।**

**शकारः**—अले इश्थिआघादआ, तं तादिशिं लअणशदभूशणिअं वशन्तशेणिअं मालिअ, शंपदं कवडकावडिके भविअ णिगूहेशि । (क)

**चारुदत्तः**—असंबद्धः खल्वसि ।

**अधिकरणिकः**—आर्यचारुदत्त, अलमनेन । ब्रूहि सत्यम् । अपि गणिका तव मित्रम् ।

**चारुदत्तः**—एवमेव ।

**अधिकरणिकः**—आर्य, वसन्तसेना क ।

**चारुदत्तः**—गृहं गता ।

**श्रेष्ठिकायस्थौ**—कधं गदा, कदा गदा, गच्छन्ती वा केण अणुगदा । (ख)

**चारुदत्तः**—(स्वगतम्) किं प्रच्छन्नं गतेति ब्रवीमि ।

**श्रेष्ठिकायस्थौ**—अज्ज, कधेहि । (ग)

**चारुदत्तः**—गृहं गता । किमन्यद्ब्रवीमि ।

**शकारः**—ममकेलकं पुप्फकलण्डकजिण्णुज्जाणं पवेशिअ अत्थणिमित्तं बाहुपाशबलक्कालेण मालिदा । अए, शंपदं वदशि घलं गदे त्ति । (घ)

**चारुदत्तः**—आः असंबद्धप्रलापिन्,

अभ्युक्षितोऽसि सलिलैर्न वलाहकानां
चाषाग्रपक्षसदृशं भृशमन्तराले ।

---

(क) अरे स्त्रीघातक, तां तादृशीं रत्नशतभूषणां वसन्तसेनां मारयित्वा, सांप्रतं कपटकापटिको भूत्वा, निगूहसि ।

(ख) कथं गता, कदा गता, गच्छन्ती वा केनानुगता ।

(ग) आर्य, कथय ।

(घ) मदीयं पुष्पकरण्डकजीर्णोद्यानं प्रवेश्यार्थनिमित्तं बाहुपाशबलात्कारेण मारिता । अये, सांप्रतं वदसि गृहं गतेति ।

---

समीक्ष्यत इत्याशङ्क्याह—छलमत्र नेति ॥ १८ ॥ **अभ्युक्षितेति ।**

**अधिकरणिकः**—भद्र, जानीषे कस्य तत्प्रवहणमिति ।

**वीरकः**—इमस्स अज्जचारुदत्तस्स । वसन्तसेणा आरूढा पुप्फकरण्डकजिण्णुज्जाणं कीलिदुं णीअदि त्ति पवहणवाहएण कहिदम् । (क)

**शकारः**—पुणो वि शुदं अज्जेहिं । (ख)

**अधिकरणिकः**—

एष भो निर्मलज्योत्स्नो राहुणा ग्रस्यते शशी ।
जलं कूलावपातेन प्रसन्नं कलुषायते ॥ २४ ॥

वीरक, पश्चादिह भवतो न्यायं द्रक्ष्यामः । य एषोऽधिकरणद्वार्यश्वस्तिष्ठति, तमेनमारुह्य गत्वा पुष्पकरण्डकोद्यानम्, दृश्यतामस्ति तत्र काचिद्विपन्ना स्त्री न वेति ।

**वीरकः**—जं अज्जो आणवेदि । (इति निष्क्रान्तः । प्रविश्य च ।) गदो म्हि तहिं । दिट्ठं च मए इत्थिआकलेवरं सावएहिं विलुप्पन्तम् । (ग)

**श्रेष्ठिकायस्थौ**—कधं तुए जाणिदं इत्थिआकलेवरं त्ति । (घ)

**वीरकः**—सावसेसेहिं केसहत्थपाणिपादेहिं उवलक्खिदं मए ।(ङ)

**अधिकरणिकः**—अहो, धिग्वैषम्यं लोकव्यवहारस्य ।

---

कितव्यम्' इति भणन्नेव चन्दनमहत्तरकेण पादेन ताडितोऽस्मि । एतच्छ्रुत्वार्यमिश्राः प्रमाणम् ।

(क) अस्यार्यचारुदत्तस्य । वसन्तसेनारूढा पुष्पकरण्डकजीर्णोद्यानं क्रीडितुं नीयत इति प्रवहणवाहकेन कथितम् ।

(ख) पुनरपि श्रुतमार्यैः ।

(ग) यदार्य आज्ञापयति । गतोऽस्मि तत्र । दृष्टं च मया स्त्रीकलेवरं श्वापदैर्विलुप्यमानम् ।

(घ) कथं त्वया ज्ञातं स्त्रीकलेवरमिति ।

(ङ) सावशेषैः केशहस्तपाणिपादैरुपलक्षितं मया ।

---

**एष इति** ॥ २४ ॥ सावएहिं श्वापदैः ॥ [सावसेसेहिं] सावशेषाभ्याम् ॥

**चारुदत्तः**—आभरणान्याभरणानीति। न जाने, किंत्वस्मद्गृहादानीतानीति जाने।

**शकारः**—उज्जाणं पवेशिअ पढमं मालेशि। कवडकावडिआए शंपदं णिगूहेशि। (क)

**अधिकरणिकः**—आर्यचारुदत्त, सत्यमभिधीयताम्।

इदानीं सुकुमारेऽस्मिन्निःशङ्कं कर्कशाः कशाः।
तव गात्रे पतिष्यन्ति सहास्माकं मनोरथैः॥ ३६॥

**चारुदत्तः**—

अपापानां कुले जाते मयि पापं न विद्यते।
यदि संभाव्यते पापमपापेन च किं मया॥ ३७॥

(स्वगतम्।) न च मे वसन्तसेनाविरहितस्य जीवितेन कृत्यम्। (प्रकाशम्।) भोः, किं बहुना।

मया किल नृशंसेन लोकद्वयमजानता।
स्त्रीरत्नं च विशेषेण शेषमेषोऽभिधास्यति॥ ३८॥

**शकारः**—वावादिदा। अले, तुमं पि भण, मए वावादिदेत्ति। (ख)

**चारुदत्तः**—त्वयैवोक्तम्।

**शकारः**—शुणेध शुणेध भट्टालका, एदेण मालिदा। एदेण ज्जेव शंशए छिण्णे। एदश्श दलिद्दचालुदत्तश्श शालीले दण्डे धालीअदु। (ग)

---

(क) उद्यानं प्रवेश्य प्रथमं मारयसि। कपटकापटिकतया सांप्रतं निगूहसि।

(ख) व्यापादिता। अरे, त्वमपि भण, मया व्यापादितेति।

(ग) शृणुत शृणुत भट्टारकाः, एतेन मारिता। एतेनैव संशयश्छिन्नः। एतस्य दरिद्रचारुदत्तस्य शारीरो दण्डो धार्यताम्।

---

पापकम्। सत्यमिति द्वे [अ]प्यक्षरे इति स्वरूपोक्तिः। 'न भवति पापस्य निमित्तमिति यस्मात्' इति प्राचीनटीका। अलीयेण(?) अलीकं कर्तृ। सत्यापेक्षया बह्वक्षरमपीत्यर्थः। सत्यं पूर्वोक्तस्वरूपत्वाद्व्यक्षरमपि कर्मभूतम्। मा निगूहति मा संवृणोति॥ ३५॥ अतिकापटिकतया निगूहसि॥ **इदानीमिति**। कशा अश्वताडिनी॥ ३६॥ **अपापानामिति**॥ ३७॥ **मयेति**। स्त्रीरेव

(नेपथ्ये ।)

हा ताद, हा पिअवअस्स। (क)

**चारुदत्तः**—(आकर्ण्य सकरुणम् ।) भोः स्वजातिमहत्तर, इच्छाम्यहं भवतः सकाशात्प्रतिग्रहं कर्तुम् ।

**चाण्डालौ**—किं अह्माणं हत्थादो पडिग्गहं कलेशि । (ख)

**चारुदत्तः**—शान्तं पापम् । नापरीक्ष्यकारी दुराचारः पालक इव चाण्डालः । तत्परलोकार्थं पुत्रमुखं द्रष्टुमभ्यर्थये ।

**चाण्डालौ**—एव्वं कलीअदु । (ग)

(नेपथ्ये ।)

हा ताद, हा आवुक । (घ)

(चारुदत्तः श्रुत्वा सकरुणम् 'भोः स्वजातिमहत्तर' (२६१ पृष्ठे) इत्यादि पठति ।)

**चाण्डालौ**—अले पउला, खणं अन्तलं देध। एशे अज्जचालुदत्ते पुत्तमुहं पेक्खदु । (नेपथ्याभिमुखम् ।) अज्ज, इदो इदो । आअच्छ ले दालआ, आअच्छ । (ङ)

(ततः प्रविशति दारकमादाय विदूषकः ।)

**विदूषकः**—तुवरदु तुवरदु भद्दमुहो । पिदा दे मारिदुं णीअदि । (च)

**दारकः**—हा ताद, हा आवुक । (छ)

**विदूषकः**—हा पिअवअस्स, कहिं मए तुमं पेक्खिदव्वो । (ज)

---

(क) हा तात, हा प्रियवयस्य ।

(ख) किमस्माकं हस्तात्प्रतिग्रहं करोषि ।

(ग) एवं क्रियताम् ।

(घ) हा तात, हा पितः ।

(ङ) हे पौराः, क्षणमन्तरं दत्त । एष आर्यचारुदत्तः पुत्रमुखं पश्यतु । आर्य, इत इतः । आगच्छ रे दारक, आगच्छ ।

(च) त्वरतां त्वरतां भद्रमुखः । पिता ते मारयितुं नीयते ।

(छ) हा तात, हा पितः ।

(ज) हा प्रियवयस्य, कुत्र मया त्वं द्रष्टव्यः ।

**चाण्डालौ**—भट्टके, पिट्टिअ एदं चेडं णिक्खालेहि । (क)

**शकारः**—णिक्कम ले । (इति निष्कामयति ।) अले चाण्डाला, किं विलम्बेध । मालेध एदम् । (ख)

**चाण्डालौ**—जदि तुवलशि ता शअं ज्जेव मालेहि । (ग)

**रोहसेनः**—अले चाण्डाला, मं मारेध । मुञ्चध आवुकम् । (घ)

**शकारः**—शपुत्तं ज्जेव एदं मालेध । (ङ)

**चारुदत्तः**—सर्वमस्य मूर्खस्य संभाव्यते । तद्गच्छ पुत्र, मातुः समीपम् ।

**रोहसेनः**—किं मए गदेण कादव्वम् । (च)

**चारुदत्तः**—

आश्रमं वत्स गन्तव्यं गृहीत्वाद्यैव मातरम् ।
मा पुत्र पितृदोषेण त्वमप्येवं गमिष्यसि ॥ ३२ ॥

तद्वयस्य, गृहीत्वैनं व्रज ।

**विदूषकः**—भो वअस्स, एव्वं तुए जाणिदम्, तुए विणा अहं पाणाइं धारेमि त्ति । (छ)

**चारुदत्तः**—वयस्य, स्वाधीनजीवितस्य न युज्यते तव प्राणपरित्यागः ।

---

(क) भट्टक, ताडयित्वैतं चेटं निष्कासय ।
(ख) निष्काम रे । अरे अरे चाण्डालाः, किं विलम्बध्वम् । मारयतैनम् ।
(ग) यदि त्वरयसे तदा स्वयमेव मारय ।
(घ) अरे चाण्डालाः, मां मारयत । मुञ्चत पितरम् ।
(ङ) सपुत्रमेवैतं मारयत ।
(च) किं मया गतेन कर्तव्यम् ।
(छ) भो वयस्य, एवं त्वया ज्ञातम्, त्वया विनाहं प्राणान्धारयामीति ।

---

तुवलशि त्वरसे ॥ **आश्रममिति** ॥ ३२ ॥ किं ओहशशीत्यादि । गाथा । किमवहससि हे शक (?) पुरुषं दृष्ट्वा दैवपर्यस्तम् । विदितं न त्वमत्पी (स्त्री?) वत हे

भणावेध इमिणा जज्जलवंशखण्डेण शङ्कलेण तालिअ तालिअ । (क)

**चाण्डालः**—(प्रहारमुद्यम्य ।) भो चालुदत्त, भणाहि । (ख)

**चारुदत्तः**—(सकरुणम् ।)

प्राप्यैतद्व्यसनमहार्णवप्रपातं
न त्रासो न च मनसोऽस्ति मे विषादः ।
एको मां दहति जनापवादवह्नि-
र्वक्तव्यं यदिह मया हता प्रियेति ॥ ३३ ॥

(शकारः पुनस्तथैव ।)

**चारुदत्तः**—भो भोः पौराः । ('मया खलु नृशंसेन' (९।३०,३८) इत्यादि पुनः पठति ।)

**शकारः**—वावादिदा । (ग)

**चारुदत्तः**—एवमस्तु ।

**प्रथमचाण्डालः**—अले, तव अत्त वज्झपालिआ । (घ)

**द्वितीयचाण्डालः**—अले, तव । (ङ)

**प्रथमः**—अले, लेक्खअं कलेम्ह । (इति बहुविधं लेखकं कृत्वा ।) अले, जदि ममकेलिका वज्झपालिआ, ता चिट्ठदु दाव मुहुत्तअम् । (च)

---

(क) अरे चाण्डालमनुष्य, न भणति चारुदत्तबटुकः । तद्भणयतानेन जर्जरवंशखण्डेन शङ्कलेन ताडयित्वा ताडयित्वा ।

(ख) भोश्चारुदत्त, भण ।

(ग) व्यापादिता ।

(घ) अरे, तवात्र वध्यपालिका ।

(ङ) अरे, तव ।

(च) अरे, लेखं कुर्मः । अरे, यदि मदीया वध्यपालिका, तदा तिष्ठतु तावन्मुहूर्तकम् ।

---

एतावता । एवमेवेत्यर्थः । इदानीमित्येके ॥ सङ्कलेन वध्यपटहवादनदण्डेन । तालिअ ताडयित्वा ॥ **प्राप्येति** ॥ ३३ ॥ वज्झपालिआ वधपर्यायः ॥ अरे, तव ॥

**वसन्तसेना**—अज्जचारुदत्त, किं णेदम् । (क) (इत्युरसि पतति ।)

**भिक्षुः**—अज्जचालुदत्त, किं णेदम् । (ख) (इति पादयोः पतति ।)

**चाण्डालः**—(सभयमपसृत्य ।) कधम्, वशन्तशेणा । णं क्खु अम्हेहिं शाहू ण वावादिदे । (ग)

**भिक्षुः**—(उत्थाय ।) अले, जीवदि चालुदत्ते । (घ)

**चाण्डालः**—जीवदि वश्शशदम् । (ङ)

**वसन्तसेना**—(सहर्षम् ।) पच्चुज्जीविदम्हि । (च)

**चाण्डालः**—ता जाव एदं वुत्तं राइण्णो जण्णवाडगदश्श णिवेदेम्ह । (छ)

(इति निष्क्रामतः ।)

**शकारः**—(वसन्तसेनां दृष्ट्वा सत्रासम् ।) हीमादिके । केण गब्भदाशी जीवाविदा । उक्कन्ताइं मे पाणाइं । भोदु । पलाइश्शम् । (ज) (इति पलायते ।)

**चाण्डालः**—(उपसृत्य ।) अले, णं अम्हाणं ईदिशी लाआणत्ती—जेण शा वावादिदा, तं मालेधत्ति । ता लट्टिअशालअं ज्जेव अण्णेशम्ह । (झ)

(इति निष्क्रान्तौ ।)

---

(क) आर्यचारुदत्त, किं न्विदम् ।

(ख) आर्यचारुदत्त, किं न्विदम् ।

(ग) कथम्, वसन्तसेना । ननु खल्वस्माभिः साधुर्न व्यापादितः ।

(घ) अरे, जीवति चारुदत्तः ।

(ङ) जीवति वर्षशतम् ।

(च) प्रत्युज्जीवितास्मि ।

(छ) तद्यावदेतद्वृत्तं राज्ञो यज्ञवाटगतस्य निवेदयावः ।

(ज) आश्चर्यम् । केन गर्भदासी जीवनं प्रापिता । उत्क्रान्ता मे प्राणाः । भवतु । पलायिष्ये ।

(झ) अरे, नन्वस्माकमीदृशी राजाज्ञप्तिः—येन सा व्यापादिता, तं मारयतेति । तद्राष्ट्रियश्यालमेवान्विष्यावः ।

**धूता**—वरं पावाचरणे। ण उण अज्जउत्तस्स अमङ्गलाकण्णणम्। (क)

**शर्विलकः**—(पुरोऽवलोक्य।) आसन्नहुतवहार्या। तत्त्वर्यतां त्वर्यताम्।

(चारुदत्तस्त्वरितं परिक्रामति।)

**धूता**—रअणिए, अवलम्ब दारअम्, जाव अहं समीहिदं करेमि। (ख)

**चेटी**—(सकरुणम्।) अहं पि जधोवदेसिणिम्हि भट्टिणीए। (ग)

**धूता**—(विदूषकमवलोक्य।) अज्जो दाव अवलम्बेदु। (घ)

**विदूषकः**—(सावेगम्।) समीहिदसिद्धिए पउत्तेण बम्हणो अग्गदो कादव्वो। अदो भोदीए अहं अग्गणी होमि। (ङ)

**धूता**—कधं पच्चादिट्ठम्हि दुवेहिं। (बालकमालिङ्ग्य।) जाद, तुमं ज्जेव पज्जवट्ठावेहि अत्ताणं अम्हाणं तिलोदअदाणाअ। अदिक्कन्ते किं मणोरहेहिं। (सनिःश्वासम्।) ण क्खु अज्जउत्तो तुमं पज्जवट्ठाविस्सदि। (च)

**चारुदत्तः**—(आकर्ण्य सहसोपसृत्य।) अहमेव पर्यवस्थापयामि बालिशम्। (इति बालकं बाहुभ्यामुत्थाप्य वक्षसालिङ्गति।)

---

(क) वरं पापाचरणम्। न पुनरार्यपुत्रस्यामङ्गलाकर्णनम्।

(ख) रदनिके, अवलम्बस्व दारकम्। यावदहं समीहितं करोमि।

(ग) अहमपि यथोपदेशिन्यस्मि भट्टिन्याः।

(घ) आर्यस्तावदवलम्बताम्।

(ङ) समीहितसिद्ध्यै प्रवृत्तेन ब्राह्मणोऽग्रे कर्तव्यः। अतो भवत्या अहमग्रणीर्भवामि।

(च) कथं प्रत्यादिष्टास्मि द्वाभ्याम्। जात, त्वमेव पर्यवस्थापयात्मानमस्माकं तिलोदकदानाय। अतिक्रान्ते किं मनोरथैः। न खल्वार्यपुत्रस्त्वां पर्यवस्थापयिष्यति।

---

**त्वरयेति**॥ ५६॥ पुस्तकान्तरपाठदर्शनव्याख्या—**अहमेवेति**। पर्यवस्था-

# मृच्छकटिकस्थश्लोकानां सूची ।


| | अङ्कः | श्लोकः | | अङ्कः | श्लोकः |
|---|---|---|---|---|---|
| अंसेन विभ्रत्करवीरमालां | १० | २१ | अयं हि पातकी विप्रो ... | ९ | ३९ |
| अग्राह्या मूर्धजेष्वेताः ... | ८ | २१ | अयं च सुगतज्वालः ... | ४ | ११ |
| अङ्गारकविरुद्धस्य ... | ९ | ३३ | अयं तव शरीरस्य ... | ४ | ७ |
| अत्थं शदं देमि शुवण्णअं | ८ | ४० | अयमेवविधे काले ... | ९ | ३१ |
| अद्धं कलेवलं पडिवुत्तं ... | १० | ३५ | अयं पटः सूत्रदरिद्रतां ... | २ | १० |
| अद्याप्यस्य तथैव केश ... | ८ | ५ | अये शस्त्रं मया प्राप्तं ... | ६ | २४ |
| अनया हि समालब्धं ... | ३ | १५ | अलं चतुःशालमिमं प्रवेश्य | ३ | ७ |
| अन्धआले पलाअन्ती ... | १ | ३९ | अवणेध वालअजणं ... | २ | १८ |
| अन्धस्य दृष्टिरिव ... | १ | ४९ | अवनतशिरसः प्रयाम ... | ८ | १९ |
| अन्यं मनुष्यं हृदयेन ... | ४ | १६ | अवन्तिपुर्यां द्विजसार्थवाहो | १ | ६ |
| अन्यस्यामपि जातौ मा... | ८ | ४३ | अवहरइ कोवि तुरिअं ... | ६ | ११ |
| अन्यासु भित्तिषु मया ... | ३ | १४ | अविज्ञातावसक्तेन ... | १ | ५४ |
| अपण्डितास्ते पुरुषा मता मे | ४ | १२ | अशरणशरणप्रमोद- ... | ८ | ४ |
| अपतितमपि तावत्सेव- ... | ८ | ४२ | अशी शुतिक्खे वलिदे ... | १ | ३० |
| अपद्मा श्रीरेषा प्रहरण- | ५ | १२ | असौ हि दत्त्वा तिमिराव- | ३ | ६ |
| अपश्यतोऽद्य तां कान्तां | ७ | ९ | अस्मत्समक्षं हि वसन्तसेना | ८ | ३० |
| अपापानां कुले जाते ... | ९ | ३७ | आअच्छध वीसत्था ... | ६ | ६ |
| अप्येष नाम परिभूत- ... | ८ | २६ | आअद्दिदे शलोशं ... | १० | ३६ |
| अप्रीतिर्भवतु विमुच्यतां... | ८ | ४१ | आकर्षन्तु सुबद्ध्वैनं ... | १० | ५३ |
| अब्भुदये अवशाणे ... | १० | १९ | आत्मभाग्यक्षतद्रव्यः ... | ३ | २७ |
| अभअं तुह देउ हरो ... | ६ | २७ | आर्यकेणार्यवृत्तेन ... | १० | ५० |
| अभ्युक्षितोऽसि सलिलै | ९ | १९ | आलाने गृह्यते हस्ती ... | १ | ५० |
| अमी हि दृष्ट्वा मदुपेतमेत | १० | ६ | आलोकविशाला मे ... | १ | ३३ |
| अमी हि वस्त्रान्तनिरुद्ध- | १० | १६ | आलोकितं गृहशिखण्डिभि | ५ | १ |
| अमी हि वृक्षाः फलपुष्प- | ८ | ७ | आश्रमं वत्स गन्तव्यं ... | १० | ३२ |
| अमूर्हि भित्त्वा जलदान्तराणि | ५ | ४४ | आहणिऊण सरोसं ... | २ | २० |
| अमौक्तिकमसौवर्ण ... | १० | १८ | इच्छन्तं मम णेच्छति त्ति | ८ | ३७ |
| अम्हेहिं चण्डं अहि ... | १ | २८ | इदं गृहं भिन्नमदत्तदण्डो | ६ | ३ |

| | अङ्कः | श्लोकः |
|---|---|---|
| इदं तत्स्नेहसर्वस्वं ... | १० | २३ |
| इदानीं सुकुमारेऽस्मि ... | ९ | ३६ |
| इन्दे प्पवाहिअन्ते ... | १० | ७ |
| इयं हि निद्रा नयनावलम्बिनी | ३ | ८ |
| इयं रङ्गप्रवेशेन कलानां... | १ | ४२ |
| इह सर्वस्वफलिनः ... | ४ | १० |
| ईदृशे व्यवहाराग्नौ ... | ९ | ४० |
| ईदृशैः श्वेतकाकीयै ... | ९ | ४१ |
| उज्जाणेसु सहासु अ ... | ६ | ७ |
| उत्कण्ठितस्य हृदयानुगुणा | ३ | ३ |
| उत्ताशिता गच्छशि ... | १ | १९ |
| उत्तिष्ठ भोः पतितसाधु... | १० | ३१ |
| उदयति हि शशाङ्कः ... | १ | ५७ |
| उदयन्तु नाम मेघाः ... | ४ | ३३ |
| उन्नमति नमति वर्षति ... | ५ | २६ |
| उपरितलनिपातितेष्टको | ३ | २२ |
| ऋग्वेदं सामवेदं गणित... | १ | ४ |
| एककार्यनियोगेऽपि ... | ६ | १६ |
| एतत्तद्धृतराष्ट्रवक्त्र ... | ५ | ६ |
| एतत्तु मां दहति ... | १ | १२ |
| एताः पुनर्हर्म्यगताः स्त्रियो मां | १० | ११ |
| एता निषिक्तरजतद्रव ... | ५ | ४ |
| एताभिरिष्टिकाभिः ... | ३ | ३० |
| एता हसन्ति च रुदन्ति च | ४ | १४ |
| एतेन मापयति भित्तिषु | ३ | १६ |
| एते हि विद्युद्गुणबद्धकक्षा | ५ | २१ |
| एतैः पिष्टतमालवर्णकनिभै | ५ | ४६ |
| एतैरार्द्रतमालपत्रमलिनै... | ५ | २० |
| एतैरेव यदा गजेन्द्र- ... | ५ | १८ |
| एत्थ मए विण्णविदा ... | ६ | २५ |
| एदं दोशकलण्डअं ... | ८ | ३६ |
| एदेहिं दे दशणहुप्पल ... | ८ | २० |

| | अङ्कः | श्लोकः |
|---|---|---|
| एव्वं दूलमदिक्कन्ते ... | १० | ५२ |
| एशा णाणकमूशिका ... | १ | २३ |
| एशाशि वाशु शिलशि गग- | १ | ४१ |
| एशे गुणलअणणिही ... | १० | १४ |
| एशे पडामि चलणेशु ... | ८ | १८ |
| एशे म्हि तुलिदतुलिदे ... | ८ | ४५ |
| एष ते प्रणयो विप्र ... | १ | ४५ |
| एष भो निर्मलज्योत्स्नो ... | ९ | २४ |
| एषा फुल्लकदम्बनीप ... | ५ | ३५ |
| एषासि वयसो दर्पात्कु ... | १ | ४० |
| एसो असोअवुच्छो ... | ४ | ३१ |
| एह्येहीति शिखण्डिनां ... | ५ | २३ |
| ऐरावतोरसि चलेव ... | ५ | ३३ |
| ओशलध देध मग्गं ... | १० | ३० |
| ओहारिओ पवहणो ... | ६ | १२ |
| कः श्रद्धास्यति भूतार्थं ... | ३ | २४ |
| ” ” ... | ५ | ३४ |
| कश्चालुआ गोच्छड- ... | १ | ५१ |
| कत्ताशद्दे णिण्णाणअश्श | २ | ५ |
| करिकरसमबाहुः सिंह ... | ७ | ५ |
| कस्सट्टमो दिणअरो ... | ६ | ९ |
| कस्स तुहं तणुमज्झे ... | २ | १६ |
| कहिं कहिं सुसहिअ ... | २ | ३ |
| काश्चित्तुच्छयति प्रपूरयति | १० | ५९ |
| का उण तुलिदं एशा ... | १० | ३७ |
| कामं नीचमिदं वदन्तु ... | ३ | ११ |
| कामं प्रदोषतिमिरेण ... | १ | ३५ |
| किं अच्छध वीसद्धा ... | ६ | ५ |
| किं यात्यस्य पुरः शनैः प्रवहणं | ७ | २ |
| किं याशि धावशि पलाअशि | १ | १८ |
| किं यासि बालकदलीव | १ | २० |
| किं शे शक्के वालिपुत्ते महि | ८ | ३४ |

| | अङ्कः | श्लोकः |
|---|---|---|
| किं कुलेनोपदिष्टेन ... | ८ | २९ |
| ,, ,, ... | ९ | ७ |
| किं ते ह्यहं पूर्वरतिप्रसक्ता | ५ | २९ |
| किं त्वं कटीतटनिवे ... | १ | २७ |
| किं त्वं पदैर्मम पदानि ... | १ | २२ |
| किं त्वं भयेन परिवर्तित- | १ | १७ |
| किं नु नाम भवेत्कार्यं ... | ८ | ३९ |
| किं नु स्वर्गात्पुनः प्राप्ता | १० | ४० |
| किं पेक्खध छिज्जन्तं ... | १० | ४ |
| किं पेक्खध शप्पुलिशं | १० | २४ |
| किं भीमशेणे जमदग्गिपुत्ते | १ | २९ |
| कुतो बाष्पाम्बुधाराभिः | १० | ४१ |
| कृत्वा शरीरपरिणाहसुख- | ३ | ९ |
| कृत्वा समुद्रमुदकोच्छ्रय- | ९ | २२ |
| कृत्वैवं मनुजपतेर्महद्व्यलीकं | ७ | ८ |
| केयमभ्युद्यते शस्त्रे ... | १० | ३८ |
| केशवगात्रश्यामः ... | ५ | ३ |
| को तं गुणारविन्दं ... | ६ | १३ |
| कोऽयमेवंविधे काले ... | १० | २६ |
| क्षीरिण्यः सन्तु गावो ... | १० | ६० |
| क्षेमेण व्रज बान्धवान् ... | ७ | ७ |
| खणेण गण्ठी खणजूलके मे | ९ | २ |
| खलचरित निकृष्ट जात- | ८ | ३२ |
| गता नाशं तारा उप ... | ५ | २५ |
| गर्जन्ति शैलशिखरेषु ... | ५ | १३ |
| गर्ज वा वर्ष वा शक्र ... | ५ | ३१ |
| गुणप्रवालं विनयप्रशाखं | ४ | ३२ |
| गुणेषु यत्नः पुरुषेण कार्यः | ४ | २३ |
| गुणेष्वेव हि कर्तव्यः ... | ४ | २२ |
| घोणोन्नतं मुखमपाङ्ग- ... | ९ | १६ |
| चन्दनश्चन्द्रशीलाढ्यो ... | ६ | २६ |
| चाणक्केन जधा शीदा ... | ८ | ३५ |
| चारुदत्तविनाशाय ... | ८ | ४४ |
| चिन्तासक्तनिमग्नमन्त्रि- | ९ | १४ |
| चिरं खलु भविष्यामि | १० | १७ |
| छन्नं कार्यमुपक्षिपन्ति ... | ९ | ३ |
| छन्नं दोषमुदाहरन्ति ... | ९ | ४ |
| छायार्थं ग्रीष्मसंतप्तो ... | ४ | १८ |
| छायासु प्रतिमुक्तशष्प ... | ८ | ११ |
| जइ वज्जसि पादालं ... | २ | ३ |
| जदिच्छशे लम्बदशाविशालं | ८ | २२ |
| जधा जधा वश्शदि अब्भ | ५ | १० |
| जयति वृषभकेतुर्दक्षयज्ञ- | १० | ४५ |
| जलधर निर्लज्जस्त्वं ... | ५ | २८ |
| जाणन्तो वि हु जादिं ... | ६ | २१ |
| जाणामि चारुदत्तं ... | ६ | १५ |
| जाणामि ण कीलिश्शं ... | २ | ६ |
| जादी तुज्झ विसुद्धा ... | ६ | २३ |
| जूदेण तं कदं मे ... | २ | १७ |
| जे अत्तबलं जाणिअ ... | २ | १४ |
| जे चुम्बिदे अम्बिकमादु- | ८ | १९ |
| जेण म्हि गब्भदाशे ... | ८ | २५ |
| ज्ञातीन्विटान्स्वभुज- ... | ४ | २६ |
| ज्ञातो हिं किं नु खलु ... | ९ | ९ |
| झाणज्झणन्तबहुभूशण ... | १ | २५ |
| णअलीपधाणभूदे ... | १० | ८ |
| ण अ लुअदि अन्तलिक्खे | १० | ९ |
| णवबन्धणमुक्काए ... | २ | १ |
| णहमज्झगदे शूले ... | ८ | १० |
| ण हु अम्हे चाण्डाला ... | १० | २२ |
| णिव्वक्कलं मूलकपेशिवण्णं | १ | ५२ |
| ण्हादेहं शलिलजलेहिं ... | ९ | १ |
| तर्कि ण कलअ कालण | १० | १ |
| तं तस्य स्वरसंक्रमं ... | ३ | ५ |

| | अङ्कः | श्लोकः |
|---|---|---|
| तपसा मनसा वाग्भिः ... | १ | १६ |
| तयोरिदं सत्सुरतोत्सवा- | १ | ७ |
| तरुणजनसहायश्चिन्त्यतां | १ | ३१ |
| तालीषु तारं विटपेषु मन्द्रं | ५ | ५२ |
| तुलनं चाद्रिराजस्य ... | ९ | २० |
| तेनास्म्यकृतवैरेण ... | १० | २८ |
| त्यजति किल तं जयश्री | ६ | १८ |
| त्रेता हृतसर्वस्वः ... | २ | ९ |
| त्वत्स्नेहबद्धहृदयो हि ... | ४ | ९ |
| त्वदर्थमेतद्विनिपात्य- ... | १० | ४२ |
| त्वद्यानं यः समारुह्य ... | १० | ५१ |
| त्वरया सर्पणं तत्र ... | १० | ५६ |
| दत्त्वा निशाया वचनीय- | ४ | १ |
| दाक्षिण्योदकवाहिनी ... | ८ | ३८ |
| दारिद्र्य शोचामि भवन्तमे- | १ | ३८ |
| दारिद्र्यात्पुरुषस्य ... | १ | ३६ |
| दारिद्र्याद्ध्रियमेति ... | १ | १४ |
| दारिद्र्यान्मरणाद्वा ... | १ | ११ |
| दारिद्र्येणाभिभूतेन ... | ४ | ५ |
| दिण्णकलवीलदामे ... | १० | २ |
| दिष्ट्या भो व्यसनमहार्णवा- | १० | ४८ |
| दीनानां कल्पवृक्षः ... | १ | ४८ |
| दुर्बलं नृपतेश्चक्षु ... | ९ | ३२ |
| दुर्वर्णोऽसि विनष्टोऽसि ... | २ | १३ |
| दुष्टात्मा परगुणमत्सरी ... | ९ | २७ |
| देशः को नु जलावसेकशिथि- | ३ | १२ |
| दो ज्जेव पूअणीआ ... | ६ | १४ |
| द्रव्यं लब्धं द्यूतेनैव ... | २ | ८ |
| द्वयमिदमतीव लोके ... | ४ | २५ |
| द्विरदेन्द्रगतिश्चकोरनेत्रो | १ | ३ |
| धनैर्वियुक्तस्य नरस्य लोके | ५ | ४० |
| धन्यानि तेषां खलु जीवितानि | ५ | ४९ |
| धाराभिरार्यजनचित्त- ... | ५ | ४५ |
| धिगस्तु खलु दारिद्र्य ... | ३ | १९ |
| न खलु मम विषादः ... | ४ | २० |
| न गणयति पराभवं ... | २ | ७ |
| न पर्वताग्रे नलिनी ... | ४ | १७ |
| न भीतो मरणादस्मि ... | १० | २७ |
| न महीतलस्थितिसहानि | १० | ५५ |
| नयनसलिलसिक्तं ... | १० | ३ |
| नरपतिपुरुषाणां ... ... | ७ | ३ |
| निःश्वासोऽस्य न शङ्कितः | ३ | १८ |
| निवासश्चिन्तायाः ... | १ | १५ |
| निष्पन्दीकृतपद्मषण्ड- ... | ५ | २४ |
| नृणां लोकान्तरस्थानां ... | ९ | ४२ |
| नृपतिपुरुषशङ्कितप्रचारं ... | ३ | १० |
| नो मुष्णाम्यबलां ... | ४ | ६ |
| पक्षविकलश्च पक्षी ... | ५ | ४१ |
| पङ्कक्लिन्नमुखाः पिबन्ति ... | ५ | १४ |
| पच्चज्जण जेण मालिदा ... | ८ | २ |
| पद्मव्याकोशं भास्करं ... | ३ | १३ |
| परगृहललिताः परान्नपुष्टाः | ४ | २८ |
| परिजनकथासक्तः ... | ४ | ३ |
| परिज्ञातस्य मे राज्ञा ... | ९ | ८ |
| पर्यङ्कग्रन्थिबन्धद्विगुणित | १ | १ |
| पवनचपलवेगः स्थूल ... | ५ | १७ |
| पश्यन्ति मां दशदिशो ... | ८ | २४ |
| पातु वो नीलकण्ठस्य ... | १ | २ |
| पादप्पहारपरिभव ... | ९ | २३ |
| पादेनैकेन गगने ... | २ | ११ |
| पूर्वं मानादवज्ञाय ... | ८ | १७ |
| पूर्वानुबद्धवैरेण ... ... | १० | ४४ |
| प्रभवति यदि धर्मो दूषित- | १० | ३४ |
| प्रविश गृहमिति प्रतोद्यमा- | १ | ५६ |
| प्रसरसि भयविक्लवा ... | १ | २४ |
| प्राप्तोऽहं व्यसनकृशां ... | १० | २५ |

| | अङ्कः | श्लोकः |
|---|---|---|
| प्राप्यैतद्व्यसनमद्दार्णव- ... | १० | ३३ |
| प्रियसुहृदमकारणे ... | ४ | २७ |
| बलाका पाण्डुरोष्णीषं ... | ५ | १९ |
| वहुकुशुमविचित्तिदा ... | ८ | ८ |
| वालां स्त्रियं च नगरस्य | ८ | २३ |
| भण कस्स जम्मछट्टो ... | ६ | १० |
| भवेद्गोष्ठीयानं न च ... | ६ | ४ |
| भाग्यानि मे यदि तदा | ६ | २ |
| भीदाभअप्पदाणं ... | ६ | १९ |
| भीमस्यानुकरिष्यामि ... | ६ | १७ |
| भुजग इव गतौ गिरिः ... | ३ | २१ |
| भक्ष्येणाप्यर्जयिष्यामि ... | ३ | २६ |
| भो मेघ गम्भीरतरं नद | ५ | ४७ |
| मंशेण तिक्खामिलकेण ... | १० | २९ |
| मखशतपरिपूतं गोत्रमु- | १० | १२ |
| मदनमपि गुणैर्विशेषयन्ती | ४ | ४ |
| मम मअणमणङ्गं ... | १ | २१ |
| मया किल नृशंसेन ... | ९ | ३८ |
| मया खलु नृशंसेन ... | ९ | ३० |
| मयाप्ता महती बुद्धि ... | ४ | २१ |
| मयि विनिहितदृष्टि ... | ९ | १२ |
| महावाताध्मातैर्महिष ... | ५ | २२ |
| मा दाव जइ वि एसो ... | ४ | २९ |
| मा दुग्गदोत्ति परिहवो ... | १ | ४३ |
| मार्जारः क्रमणे मृग ... | ३ | २० |
| मूढे निरन्तरपयोधरया | ५ | १५ |
| मेघा वर्षन्तु गर्जन्तु ... | ५ | १६ |
| मेघो जलार्द्रमहिषोदर- | ५ | २ |
| मैत्रेय भोः किमिद ... | ९ | २९ |
| यं समालम्ब्य विश्वासं ... | ३ | २९ |
| ,, ,, | ५ | ७ |
| यः कश्चित्त्वरितगतिः ... | ४ | २ |

| | अङ्कः | श्लोकः |
|---|---|---|
| यः स्तब्धं दिवसान्तमानत- | २ | १२ |
| यत्नेन सेवितव्यः पुरुषः... | ८ | ३३ |
| यथा यथेदं निपुणं विचा- | ९ | २५ |
| यथैव पुष्पं प्रथमे विकाशे | ९ | २६ |
| यदा तु भाग्यक्षयपी- ... | १ | ५३ |
| यदि कुप्यसि नास्ति रतिः | ५ | ३४ |
| यदि गर्जति वारिधरो ... | ५ | ३२ |
| यदि तावत्कृतान्तेन ... | ३ | २५ |
| यद्वदहत्याहेतोर्मृषा ... | ५ | ३० |
| यया मे जनितः कामः ... | १ | ५५ |
| यस्यार्थास्तस्य सा कान्ता | ५ | ९ |
| यासां बलिः सपदि ... | १ | ९ |
| येन ते भवनं भित्त्वा ... | १० | ४९ |
| योऽस्माभिश्चिन्तितो व्याजः | ५ | ३९ |
| योऽहं लतां कुसुमिता ... | ९ | २८ |
| रक्तं च नाम मधुरं च ... | ३ | ४ |
| रक्तं तदेव वरवस्त्रमियं च | १० | ४३ |
| रन्ध्रानुसारी विषमः ... | ८ | २७ |
| राजमार्गो हि शून्योऽयं | १ | ५८ |
| रूक्षस्वरं वाशति वायसो- | ९ | १० |
| रे रे वीरअ किं किं ... | ६ | ८ |
| लज्जाए भीलुदाए वा ... | ९ | १७ |
| लब्धा चारित्रशुद्धि ... | १० | ५८ |
| लाअशशुले मम पिदा ... | ९ | ६ |
| लामेहि अ लाअवल्लहं ... | १ | २६ |
| लिम्पतीव तमोऽङ्गानि ... | १ | ३४ |
| लेखअवावडहिअअं ... | २ | २ |
| वंशं वाए शत्तछिद्दं शुशद्दं | ५ | ११ |
| वज्झम्मि णीअमाणे ... | १० | १० |
| वणिज इव भान्ति तरवः | ७ | १ |
| वर्षशतमस्तु दुर्दिन ... | ५ | ४८ |
| वर्षोदकमुद्गिरता ... | ५ | ३८ |
| वसन्तसेना किमियं द्वितीया | १० | ३९ |

| | अङ्कः | श्लोकः |
|---|---|---|
| वस्त्वन्तराणि सदृशानि भवन्ति | ९ | ३४ |
| वादादवेण तत्ता चीवल | ८ | ४६ |
| वाप्यां स्नाति विचक्षणो | १ | ३२ |
| विचलइ णेउरजुअलं ... | २ | १९ |
| विद्युज्जिह्वेनेदं महेन्द्र ... | ५ | ५१ |
| विद्युद्भिर्ज्वलतीव ... | ५ | २७ |
| विधिनैवोपनीतस्त्वं ... | ७ | ६ |
| विपर्यस्तमनश्चेष्टैः शिला | ८ | ६ |
| विभवानुगता भार्या ... | ३ | २८ |
| विषसलिलतुलाग्निप्रार्थिते | ९ | ४३ |
| विषादस्रस्तसर्वाङ्गी ... | ४ | ८ |
| वेगं करोति तुरग ... | ५ | ८ |
| वेदार्थान्प्राकृतस्त्वं वदसि | ९ | २१ |
| वैदेश्येन कृतो भवेन्मम | ३ | २३ |
| व्यवहारः सविघ्नोऽयं ... | ९ | १८ |
| शकालधणे क्खु शज्जणे | २ | १५ |
| शंजम्मध णिअपोटं ... | ८ | १ |
| शत्रुः कृतापराधः ... | १० | ५४ |
| शरचन्द्रप्रतीकाशं ... | ८ | १६ |
| शव्वकालं मए पुश्टे ... | ८ | २८ |
| शव्वे क्खु होइ लोए ... | १० | १५ |
| शशिविमलमयूख- ... | १० | १३ |
| शश्शपलक्कवलद्दे ... | ३ | २ |
| शास्त्रज्ञः कपटानुसार- ... | ९ | ५ |
| शिखा प्रदीपस्य सुवर्ण- | ३ | १७ |
| शिल मुण्डिद तुण्ड मुण्डिदे | ८ | ३ |
| शिलीश मम णिलीणे ... | ८ | १२ |
| शुक्खा वि वदेशा शे ... | १० | २० |
| शुवण्णअं देमि पिअं ... | ८ | ३१ |
| शुष्कवृक्षस्थितो ध्वाङ्क्ष ... | ९ | ११ |
| शून्यमपुत्रस्य गृहं ... | १ | ८ |
| शून्यैर्गृहैः खलु समाः ... | ५ | ४२ |

| | अङ्कः | श्लोकः |
|---|---|---|
| शूले विक्कन्ते पण्डवे ... | १ | ४७ |
| संसक्तैरिव चक्रवाक- ... | ५ | ५ |
| सकामान्विष्यतेऽस्माभिः | १ | ४४ |
| सङ्गं नैव हि कश्चिदस्य ... | १ | ३७ |
| सच्चेण सुहं क्खु लब्भइ | ९ | ३५ |
| स तावदस्माद्व्यसनार्णवो- | ७ | ४ |
| सत्यं न मे विभवनाश- | १ | १३ |
| सदा प्रदोषो मम याति | ५ | ३७ |
| समरव्यसनी प्रमादशून्यः | १ | ५ |
| समुद्रवीचीव चलस्वभावाः | ४ | १५ |
| संभ्रमघर्घरकण्ठो ... | ६ | २० |
| सर्वगात्रेषु विन्यस्तै ... | १० | ५ |
| सव्यं मे स्पन्दते चक्षु ... | ९ | १५ |
| साटोपकूटकपटानृत- ... | ५ | ३६ |
| सिण्णसिलाअलहत्थो ... | ६ | २२ |
| सीधुसुरासवमत्तिआ ... | ४ | ३० |
| सुअणे क्खु भिच्चाणुकम्पके | ३ | १ |
| सुखं हि दुःखान्यनुभूय... | १ | १० |
| सुदृष्टः क्रियतामेष ... | ४ | २४ |
| सोऽस्मद्विधानां प्रणयैः... | १ | ४६ |
| स्खलति चरणं भूमौ न्यस्तं | ९ | १३ |
| स्तम्भेषु प्रचलितवेदि- ... | ५ | ५० |
| स्त्रियो हि नाम खल्वेताः | ४ | १९ |
| स्त्रीभिर्विमानितानां ... | ८ | ९ |
| स्त्रीषु न रागः कार्यः ... | ४ | १३ |
| हत्थसंजदो मुहसंजदो ... | ८ | ४७ |
| हत्वा तं कुनृपमहं हि ... | १० | ४६ |
| हत्वा रिपुं तं बलमन्त्रहीनं | १० | ४७ |
| हा प्रेयसि प्रेयसि विद्यमाने | १० | ५७ |
| हित्वाहं नरपतिबन्धनाप- | ६ | १ |
| हिङ्गुज्जले जीरकभद्दमुश्ते | ८ | १३ |
| हिङ्गुज्जले दिण्णमरीचचुणे | ८ | १४ |

| | | मू० | डा. व्य. |
|---|---|---|---|
| एकादशगुच्छकः. | ... ... ... ... ... ... | १ | ८~॥ |
| द्वादशगुच्छकः. | ... ... ... ... ... ... | १ | ८~॥ |
| त्रयोदशगुच्छकः. | ... ... ... ... ... ... | १ | ८~॥ |



# अध्यात्मकल्पद्रुमः ।

ग्रन्थस्यास्य निर्माता तपागच्छनायकः **श्रीमुनिसुन्दरसूरिरा-सीत्** । इदं ग्रन्थरत्नं आर्हतदर्शनप्रमुखतत्त्वप्रतिपादकत्वात् प्रसाद-शालित्वाच्च शतार्थिकश्रीसोमप्रभसूरीणां सूक्तिमुक्तावल्याः शोभाम-नुहरति । इदं पुस्तकं महता प्रयासेन संपाद्य विद्वद्द्वारा सम्यक्सं-शोध्यास्माभिर्मुद्रितमस्ति । मूल्यं ॥ आणकाः मार्गव्ययः ८~

# पुरुषार्थचिन्तामणिः ।

धर्मशास्त्रीयविद्वन्मान्यग्रन्थश्रेण्यर्होऽप्ययं ग्रन्थो दौर्लभ्यान्नै-तदवधि वहूनां विदुषां दृष्टिसरणिमारुरोह । अस्मिंस्तावत् हेमाद्रि–माधवप्रभृतिधर्मशास्त्रग्रन्थस्थवाक्यानां परस्परविरोधपरिहारपूर्वकं सर्वे निर्णया एकवाक्यतयैव कृताः सन्ति । अस्य प्राचीनहस्तलि-खितपुस्तकानि महता प्रयासेन संपाद्य विद्वद्द्वारा शोधयित्वास्माभि-र्मुद्रितोऽस्ति । मू. २ रु. मार्ग० ।

# साहित्यसारम् ।

**श्रीमदच्युतरायप्रणीतं, सरसामोदाख्यव्याख्योपेतम् ।**

अयं साहित्यग्रन्थः प्राचीनालंकारसाहित्यग्रन्थपङ्क्तिसमारोहणार्ह एवास्ति । [illegible] च ग्रन्थप्रणेत्रा आसेतुहिमालयं अखिलविद्वन्मान्य–काव्यप्रकाश–रसग[illegible] स्वतीकण्ठाभरण–ध्वन्यालोक–कुवलयानन्द–साहित्यदर्पणादिप्राची[illegible] नैव तत्रतत्रोदाहरणेषु तत्तदीयोदाहरणपद्यानि संकलय्य त[illegible] पूर्वोऽखिलालंकारजातसर्वस्वभूतो निरमायि। अत्र च पृथक्[illegible] द्वादश रत्नानि सन्ति। अस्यावश्यकतामपूर्वरसवत्तां च[illegible] मास्वादयेयुरेव. मूल्यं २॥ रु. मार्ग० ।

निर्ण[illegible]

## विक्रेयानि

## संस्कृतनूतनमुद्रितपुस्तकानि ।

# हिरण्यकेशीयब्रह्मकर्मसमुच्चयः ।

### विषयसंख्या ३८८

महेश्वरभट्टी–संस्काररत्नमाला–सिंधु–प्रतापनारसिंह–व्रतकौमुदी–प्रतिष्ठावासुदेवी–शंकरभट्टीप्रभृतिसर्वमान्यग्रन्थेभ्यस्तांस्तान्प्रयोगानुद्धृत्य संगृहीतोऽयं ग्रन्थः । अत्र आह्निक–संस्कार–मिश्र–अन्त्येष्ट्याख्यानि सन्ति चत्वारि प्रकरणानि । तत्राद्ये आह्निकप्रकरण एव श्रावण्याद्या बहुविधश्राद्धप्रयोगाश्च संगृहीताः । द्वितीये संस्कारप्रकरणे जननशान्तीनां कृतः संग्रहः । तृतीये विविधव्रतोद्यापन–सुरप्रतिष्ठा–आरामकूपवृक्षाद्युत्सर्गा नानाशान्तिविधयः पुरश्चरणविधयश्च समावेशिताः । चतुर्थे सर्वप्रायश्चित्तादिसाङ्गोपाङ्गान्त्येष्टिः संन्यासपद्धतिश्च संगृहीतास्ति । मन्त्राश्चात्र पूर्णतया प्रदर्शिताः ये च मन्त्रा एकत्र पूर्णाः प्रदर्शितास्ते प्रयोगान्तरे ग्रन्थवृद्धिभिया पुनर्न प्रदर्शिताः । किंतु तेषां तत्रतत्रोपलब्धये मन्त्राणामकारादिवर्णक्रमकोशो दर्शितः । तथा याज्ञिकोपयुक्तानि रङ्गरञ्जितसर्वतोभद्रादिमण्डलान्यन्यानि ग्रहवास्त्वादिमण्डलानि चारम्भे यथावद्दत्तानि सन्ति । अनेन समुच्चयेन याज्ञिकानामतीव साहाय्यं स्यादित्यलम् ॥ मूल्यं रु. २।, मार्गव्ययः ।=

---

# साहित्यदर्पणः ।

विश्वनाथक

वागीश

स

Library IIAS, Shimla
S 891.202 2 Sh 91 MP
00024951

पुस्तक

निर्णयसागर प्रेस.